अक्कलकोटस्वामी समर्थाष्टोत्तरशतनामावली

{॥ अक्कलकोटस्वामी समर्थाष्टोत्तरशतनामावली ॥}

एका अनोळखी स्वामीभक्ताला जागृतावस्थेत श्रीस्वामी समर्थांनी सांगितलेली ही नामावली सर्व स्वामीभक्तांच्या प्रातःस्मरणीय नित्यपठणात यावी हा नामावलीच्या प्रकाशनामागचा हेतू आहे. श्रीस्वामी समर्थच तो सफल करतील असा दृढ विश्वास आहे.

आपला,

एक स्वामीभक्त (अमेरिका)

अथ श्रीस्वामी समर्थ अष्टोत्तरशत नामावली ॥

ॐ दिगंबराय नमः ।

ॐ वैराग्यांबराय नमः ।

ॐ ज्ञानांबराय नमः ।

ॐ स्वानंदांबराय नमः ।

ॐ अतिदिव्यतेजांबराय नमः ।

ॐ काव्यशक्तिप्रदायिने नमः ।

ॐ अमृतमंत्रदायिने नमः ।

ॐ दिव्यज्ञानदत्ताय नमः ।

ॐ दिव्यचक्षुदायिने नमः ।

ॐ चित्ताकर्षणाय नमः । १०

ॐ चित्तप्रशांताय नमः ।

ॐ दिव्यानुसंधानप्रदायिने नमः ।

ॐ सद्गुणविवर्धनाय नमः ।

ॐ अष्टसिद्धिदायकाय नमः ।

ॐ भक्तिवैराग्यदत्ताय नमः ।

ॐ भुक्तिमुक्तिशक्तिप्रदायिने नमः ।

ॐ आत्मविज्ञानप्रेरकाय नमः ।

ॐ अमृतानंददत्ताय नमः ।

ॐ गर्वदहनाय नमः ।

ॐ षड्रिपुहरिताय नमः । २०

ॐ भक्तसंरक्षकाय नमः ।

ॐ अनंतकोटिब्रह्मांडप्रमुखाय नमः ।

ॐ चैतन्यतेजसे नमः ।

ॐ श्रीसमर्थयतये नमः ।

ॐ आजानुबाहवे नमः ।

ॐ आदिगुरवे नमः ।

ॐ श्रीपादश्रीवल्लभाय नमः ।

ॐ नृसिंहभानुसरस्वत्यै नमः ।

ॐ अवधूतदत्तात्रेयाय नमः ।

ॐ चंचलेश्वराय नमः । ३०

ॐ कुरवपुरवासिने नमः ।

ॐ गंधर्वपुरवासिने नमः ।

ॐ गिरनारवासिने नमः ।

ॐ श्रीशैल्यनिवासिने नमः ।

ॐ ओंकारवासिने नमः ।

ॐ आत्मसूर्याय नमः ।

ॐ प्रखरतेजःप्रवर्तिने नमः ।

ॐ अमोघतेजानंदाय नमः ।

ॐ दैदीप्यतेजोधराय नमः ।

ॐ परमसिद्धयोगेश्वराय नमः । ४०

ॐ कृष्णानंद-अतिप्रियाय नमः ।

ॐ योगिराजराजेश्वराय नमः ।

ॐ अकारणकारुण्यमूर्तये नमः ।

ॐ चिरंजीवचैतन्याय नमः ।

ॐ स्वानंदकंदस्वामिने नमः ।

ॐ स्मर्तृगामिने नमः ।

ॐ नित्यचिदानंदाय नमः ।

ॐ भक्तचिंतामणीश्वराय नमः ।

ॐ अचिंत्यनिरंजनाय नमः ।

ॐ दयानिधये नमः । ५०

ॐ भक्तहृदयनरेशाय नमः ।

ॐ शरणागतकवचाय नमः ।

ॐ वेदस्फूर्तिदायिने नमः ।

ॐ महामंत्रराजाय नमः ।

ॐ अनाहतनादप्रदानाय नमः ।

ॐ सुकोमलपादांबुजाय नमः ।

ॐ चित्शक्त्यात्मने नमः । चिच्छ

ॐ अतिस्थिराय नमः ।

ॐ माध्याह्नभिक्षाप्रियाय नमः ।

ॐ प्रेमभिक्षांकिताय नमः । ६०

ॐ योगक्षेमवाहिने नमः ।

ॐ भक्तकल्पवृक्षाय नमः ।

ॐ अनंतशक्तिसूत्रधाराय नमः ।

ॐ परब्रह्माय नमः ।

ॐ अतितृप्तपरमतृप्ताय नमः ।

ॐ स्वावलंबनसूत्रदात्रे नमः ।

ॐ बाल्यभावप्रियाय नमः ।

ॐ भक्तिनिधानाय नमः ।

ॐ असमर्थसामर्थ्यदायिने नमः ।

ॐ योगसिद्धिदायकाय नमः । ७०

ॐ औदुंबरप्रियाय नमः ।

ॐ वज्रसुकोमलतनुधारकाय नमः ।

ॐ त्रिमूर्तिध्वजधारकाय नमः ।

ॐ चिदाकाशव्याप्ताय नमः ।

ॐ केशरचंदनकस्तूरीसुगंधप्रियाय नमः ।

ॐ साधकसंजीवन्यै नमः ।

ॐ कुंडलिनीस्फूर्तिदात्रे नमः ।

ॐ अलक्ष्यरक्षकाय नमः ।

ॐ आनंदवर्धनाय नमः ।

ॐ सुखनिधानाय नमः । ८०

ॐ उपमातीते नमः ।

ॐ भक्तिसंगीतप्रियाय नमः ।

ॐ अकारणसिद्धिकृपाकारकाय नमः ।

ॐ भवभयभंजनाय नमः ।

ॐ स्मितहास्यानंदाय नमः ।

ॐ संकल्पसिद्धाय नमः ।

ॐ संकल्पसिद्धिदात्रे नमः ।

ॐ सर्वबंधमोक्षदायकाय नमः ।

ॐ ज्ञानातीतज्ञानभास्कराय नमः ।

ॐ श्रीकीर्तिनाममंत्राभ्यां नमः । ९०

ॐ अभयवरदायिने नमः ।

ॐ गुरुलीलामृतधाराय नमः ।

ॐ गुरुलीलामृतधारकाय नमः ।

ॐ वज्रसुकोमलहृदयधारिणे नमः ।

ॐ सविकल्पातीतनिर्विकल्पसमाधिभ्यां नमः ।

ॐ निर्विकल्पातीतसहजसमाधिभ्यां नमः ।

ॐ त्रिकालातीतत्रिकालज्ञानिने नमः ।

ॐ भावातीतभावसमाधिभ्यां नमः ।

ॐ ब्रह्मातीत-अणुरेणुव्यापकाय नमः ।

ॐ त्रिगुणातीतसगुणसाकारसुलक्षणाय नमः । १००

ॐ बंधनातीतभक्तिकिरणबंधाय नमः ।

ॐ देहातीतसदेहदर्शनदायकाय नमः ।

ॐ चिंतनातीतप्रेमचिंतनप्रकर्षणाय नमः ।

ॐ मौनातीत-उन्मनीभावप्रियाय नमः ।

ॐ बुद्ध्यतीतसद्बुद्धिप्रेरकाय नमः ।

ॐ मत्प्रिय-पितामहसद्गुरुभ्यां नमः ।

ॐ पवित्रतमतात्यासाहेबचरणारविंदाभ्यां नमः ।

ॐ अक्कलकोटस्वामिसमर्थाय नमः ।

Encoded by Anjali Leley

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Akkalkot Swami Samarha Ashtottara Shatanamavali Lyrics in Devanagari PDF
% File name : akkalakoTa108.itx
% Category : aShTottarashatanAmAvalI
% Location : doc_deities_misc
% Author : svaamii samartha prerita
% Language : Sanskrit
% Subject : hinduism
% Transliterated by : Anjali Leley leley98 at hotmail.com

% Proofread by : Anjali Leley leley98 at hotmail.com
% Description-comments : From aShtottara naamaavalii-vichaarama.nthana saara by Shriram Kulkarni
% Latest update : November 22, 2003, June 6, 2009
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%